
ॐ

# श्रीगुरुपादपूजाविधानम्

# ŚRĪGURUPĀDAPŪJĀVIDHĀNAM



# श्रीगुरुस्तोत्रम्
## ŚRĪGURUSTOTRAM

**अखण्डमण्डलाकारं, व्याप्तं येन चराचरम्।**
**तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।१।।**

Akhaṇḍamaṇḍalākāraṃ, vyāptaṃ yena carācaram ।
Tat padaṃ darśitaṃ yena, tasmai śrīgurave namaḥ ।। 1 ।।

**अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः ।।२।।**

Ajñānatimirāndhasya, jñānāñjanaśalākayā ।
Cakṣurunmīlitaṃ yena, tasmai śrīgurave namaḥ ।। 2 ।।

**गुरुर्ब्रह्मा गुरुर्विष्णुः, गुरुर्देवो महेश्वरः।**
**गुरुरेव परं ब्रह्म, तस्मै श्रीगुरवे नमः ।।३।।**

Gururbrahmā gururviṣṇuḥ, gururdevo maheśvaraḥ ।
Gurureva paraṃ brahma, tasmai śrīgurave namaḥ ।। 3 ।।

**स्थावरं जङ्गमं व्याप्तं, यत्किञ्चित्सचराचरम्।**
**तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।४।।**

Sthāvaraṃ jaṅgamaṃ vyāptaṃ, yatkiñcit sacarācaram ।
Tat padaṃ darśitaṃ yena, tasmai śrīgurave namaḥ ।। 4 ।।

**चिन्मयं व्यापि यत्सर्वं, त्रैलोक्यं सचराचरम्।**
**तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।५।।**

Cinmayaṃ vyāpi yat sarvaṃ, trailokyaṃ sacarācaram ।
Tat padaṃ darśitaṃ yena, tasmai śrīgurave namaḥ ।। 5 ।।

सर्वश्रुतिशिरोरत्न - विराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यः, तस्मै श्रीगुरवे नमः ॥६॥

Sarvaśrutiśiroratna - virājitapadāmbujaḥ ।
Vedāntāmbujasūryo yaḥ, tasmai śrīgurave namaḥ ॥ 6 ॥

चैतन्यः शाश्वतः शान्तः, व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतः, तस्मै श्रीगुरवे नमः ॥७॥

Caitanyaḥ śāśvataḥ śāntaḥ, vyomātīto nirañjanaḥ ।
Bindunādakalātītaḥ, tasmai śrīgurave namaḥ ॥ 7 ॥

ज्ञानशक्तिसमारूढः, तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च, तस्मै श्रीगुरवे नमः ॥८॥

Jñānaśaktisamārūḍhaḥ, tattvamālāvibhūṣitaḥ ।
Bhuktimuktipradātā ca, tasmai śrīgurave namaḥ ॥ 8 ॥

अनेकजन्मसम्प्राप्त - कर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन, तस्मै श्रीगुरवे नमः ॥९॥

Anekajanmasamprāpta - karmabandhavidāhine ।
Ātmajñānapradānena, tasmai śrīgurave namaḥ ॥ 9 ॥

शोषणं भवसिन्धोश्च, ज्ञापनं सारसम्पदः ।
गुरोः पादोदकं सम्यक्, तस्मै श्रीगुरवे नमः ॥१०॥

Śoṣaṇaṃ bhavasindhośca, jñāpanaṃ sārasampadaḥ ।
Guroḥ pādodakaṃ samyak, tasmai śrīgurave namaḥ ॥ 10 ॥

न गुरोरधिकं तत्त्वं, न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति, तस्मै श्रीगुरवे नमः ॥११॥

Na guroradhikaṃ tattvaṃ, na guroradhikaṃ tapaḥ ।
Tattvajñānāt paraṃ nāsti, tasmai śrīgurave namaḥ ॥ 11 ॥

मन्नाथः श्रीजगन्नाथः, मद्गुरुः श्रीजगद्गुरुः।
मदात्मा सर्वभूतात्मा, तस्मै श्रीगुरवे नमः ॥१२॥

Mannāthaḥ śrījagannāthaḥ, madguruḥ śrījagadguruḥ I
Madātmā sarvabhūtātmā, tasmai śrīgurave namaḥ II 12 II

गुरुरादिरनादिश्च, गुरुः परमदैवतम्।
गुरोः परतरं नास्ति, तस्मै श्रीगुरवे नमः ॥१३॥

Gururādiranādiśca, guruḥ paramadaivatam I
Guroḥparataraṃ nāsti, tasmai śrīgurave namaḥ II 13 II

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देवदेव ॥१४॥

Tvam eva mātā ca pitā tvam eva,
Tvam eva bandhuśca sakhā tvam eva I
Tvam eva vidyā draviṇaṃ tvam eva,
Tvam eva sarvaṃ mama devadeva II 14 II

---

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं,
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥

Brahmānandaṃ paramasukhadaṃ kevalaṃ jñānamūrtiṃ,
dvandvātītaṃ gaganasadṛśaṃ tattvamasyādilakṣyam I
Ekaṃ nityaṃ vimalam acalaṃ sarvadhīsākṣibhūtaṃ,
bhāvātītaṃ triguṇarahitaṃ sadguruṃ taṃ namāmi II

# श्रीगुरुपादपूजा
# ŚRĪGURUPĀDAPŪJĀ

## विघ्नेश्वरप्रार्थना
**Vighneśvaraprārthanā** (Prayer to Lord Gaṇeśa)

**ॐ शुक्लाम्बरधरं विष्णुं, शशिवर्णं चतुर्भुजम्।**
**प्रसन्नवदनं ध्यायेत् , सर्वविघ्नोपशान्तये ।।**

Oṃ śuklāmbaradharaṃ viṣṇuṃ, śaśivarṇaṃ caturbhujam ।
Prasannavadanaṃ dhyāyet, sarvavighnopaśāntaye ।।

## सङ्कल्पः
**Saṅkalpaḥ** (Resolve)

**ममोपात्तसमस्तदुरितक्षयद्वारा श्रीगुरोः प्रसादसिद्ध्यर्थं**
**दृढज्ञानवैराग्यसिद्ध्यर्थञ्च श्रीगुरुपादपूजां करिष्ये ।।**

Mamopāttasamastaduritakṣayadvārā śrīguroḥ prasādasiddhyarthaṃ
dṛḍhajñānavairāgyasiddhyarthañca śrīgurupādapūjāṃ kariṣye ।।

## ध्यानम्
**Dhyānam** (Invocation)

**ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,**
**द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।**
**एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं,**
**भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।।**

**ब्रह्मविद्याप्रदातारं सद्गुरुं ध्यायामि ।। आवाहयामि ।।**

Brahmānandaṃ paramasukhadaṃ kevalaṃ jñānamūrtiṃ,
dvandvātītaṃ gaganasadṛśaṃ tattvamasyādilakṣyam ।
Ekaṃ nityaṃ vimalam acalaṃ sarvadhīsākṣibhūtaṃ,
bhāvātītaṃ triguṇarahitaṃ sadguruṃ taṃ namāmi ।।

Brahmavidyāpradātāraṃ sadguruṃ dhyāyāmi ।। Āvāhayāmi ।।

### आसनम्

**Āsanam** (Offering Seat)

**ईश्वरो गुरुरात्मेति, मूर्तिभेदविभागिने।**
**व्योमवद्व्याप्तदेहाय, दक्षिणामूर्तये नमः ॥**
**सर्वव्यापिने सद्गुरवे नमः, आसनं समर्पयामि॥**

Īśvaro gururātmeti, mūrtibhedavibhāgine ।
Vyomavadvyāptadehāya, dakṣiṇāmūrtaye namaḥ ॥
Sarvavyāpine sadgurave namaḥ, āsanaṃ samarpayāmi ॥

### पूर्णकुम्भः

**Pūrṇakumbhaḥ** (Offering Pūrṇakumbha)

**अन्तः पूर्णो बहिः पूर्णः, पूर्णकुम्भ इवार्णवे।**
**अन्तः शून्यो बहिः शून्यः, शून्यकुम्भ इवाम्बरे॥**
**पूर्णाय सद्गुरवे नमः, पूर्णकुम्भं समर्पयामि॥**

Antaḥ pūrṇo bahiḥ pūrṇaḥ, pūrṇakumbha ivārṇave ।
Antaḥ śūnyo bahiḥ śūnyaḥ, śūnyakumbha ivāmbare ॥
Pūrṇāya sadgurave namaḥ, pūrṇakumbhaṃ samarpayāmi ॥

### पाद्यम्

**Pādyam** (Offering water for washing the feet)

**यत्पादपङ्कजद्वन्द्व - ग्रहणेन मुमुक्षवः।**
**तुरीयं पादमीप्सन्ति, तस्मै श्रीगुरवे नमः॥**
**तुरीयपादप्रापकाय सद्गुरवे नमः, पाद्यं समर्पयामि॥**

Yatpādapaṅkajadvandva - grahaṇena mumukṣavaḥ ।
Turīyaṃ pādam īpsanti, tasmai śrīgurave namaḥ ॥
Turīyapādaprāpakāya sadgurave namaḥ, pādyaṃ samarpayāmi ॥

**अर्घ्यम्**

**Arghyam** (Offering water for washing the hands)

**अलब्ध्वातिशयं यस्माद्, व्यावृत्तास्तमबादयः ।**
**गरीयसे नमस्तस्मै, अविद्याग्रन्थिभेदिने ।।**

**अविद्यानाशकाय सद्गुरवे नमः, अर्घ्यं समर्पयामि ।।**

Alabdhvātiśayaṃ yasmād, vyāvṛttāstamabādayaḥ ।
Garīyase namastasmai, avidyāgranthibhedine ।।

Avidyānāśakāya sadgurave namaḥ, arghyaṃ samarpayāmi ।।

**स्नानम्**

**Snānam** (Offering water for bathing)

**यच्छुद्धवाक्यतीर्थेषु, स्नाताः पुण्या मुमुक्षवः ।**
**विरजा ब्रह्म गच्छन्ति, तस्मै श्रीगुरवे नमः ।।**

**महावाक्योपदेशकर्त्रे सद्गुरवे नमः, स्नानं समर्पयामि ।।**

Yacchuddhavākyatīrtheṣu, snātāḥ puṇyā mumukṣavaḥ ।
Virajā brahma gacchanti, tasmai śrīgurave namaḥ ।।

Mahāvākyopadeśakartre sadgurave namaḥ, snānaṃ samarpayāmi ।।

**वस्त्रम्**

**Vastram** (Offering Dress)

**मूलं तरोः केवलमाश्रयन्तः, पाणिद्वयं भोक्तुममत्रयन्तः ।**
**कन्थामिव श्रीमपि कुत्सयन्तः, कौपीनवन्तः खलु भाग्यवन्तः ।।**

**कृतकृत्याय सद्गुरवे नमः, वस्त्रं समर्पयामि ।। भस्मादिकञ्च समर्पयामि ।।**

Mūlaṃ taroḥ kevalam āśrayantaḥ, pāṇidvayaṃ bhoktum amatrayantaḥ ।
Kanthām iva śrīm api kutsayantaḥ, kaupīnavantaḥ khalu bhāgyavantaḥ ।।

Kṛtakṛtyāya sadgurave namaḥ, vastraṃ samarpayāmi ।।
Bhasmādikañca samarpayāmi ।।

### गन्धः

**Gandhaḥ** (Offering Sandal-paste)

विप्राणां विनयो ह्येषः, शमः प्राकृत उच्यते।
दमः प्रकृतिदान्तत्वाद्, एवं विद्वाञ्शमं व्रजेत्॥
प्रकृतिशान्ताय सद्गुरवे नमः, शीतान्गन्धान्समर्पयामि॥

Viprāṇāṃ vinayo hyeṣaḥ, śamaḥ prākṛta ucyate ।
Damaḥ prakṛtidāntatvād, evaṃ vidvāñśamaṃ vrajet ॥
Prakṛtiśāntāya sadgurave namaḥ, śītān gandhān samarpayāmi ॥

### कुङ्कुमम्

**Kuṅkumam** (Offering Kuṅkumam)

श्रोत्रियोऽवृजिनोऽकाम - हतो यो ब्रह्मवित्तमः।
ब्रह्मण्युपरतः शान्तः, निरिन्धन इवानलः॥
विरक्ताय सद्गुरवे नमः, हरिद्राकुङ्कुमं समर्पयामि॥

Śrotriyo'vṛjino'kāma - hato yo brahmavittamaḥ ।
Brahmaṇyuparataḥ śāntaḥ, nirindhana ivānalaḥ ॥
Viraktāya sadgurave namaḥ, haridrākuṅkumaṃ samarpayāmi ॥

### पुष्पमाला

**Puṣpamālā** (Offering Garland)

येन षड्लिङ्गसूत्रेण, कृता तात्पर्यमालिका।
वेदान्तवाक्यपुष्पेभ्यः, तस्मै श्रीगुरवे नमः॥
वेदान्ततात्पर्यबोधकाय सद्गुरवे नमः, पुष्पमालिकां समर्पयामि॥

Yena ṣaḍliṅgasūtreṇa, kṛtā tātparyamālikā ।
Vedāntavākyapuṣpebhyaḥ, tasmai śrīgurave namaḥ ॥
Vedāntatātparyabodhakāya sadgurave namaḥ, puṣpamālikāṃ samarpayāmi ॥

### अर्चना

**Arcanā** (Worshipping with flowers)

**भावाद्वैतं सदा कुर्यात्, क्रियाद्वैतं न कर्हिचित्।**
**अद्वैतं त्रिषु लोकेषु, नाद्वैतं गुरुणा सह॥**

**परमपूज्याय सद्गुरवे नमः, पुष्पैः पूजयामि॥**

(See Appendix for Aṣṭottaraśata-nāmāvaliḥ)

Bhāvādvaitaṃ sadā kuryāt, kriyādvaitaṃ na karhicit ।
Advaitaṃ triṣu lokeṣu, nādvaitaṃ guruṇā saha ॥

Paramapūjyāya sadgurave namaḥ, puṣpaiḥ pūjayāmi ॥

### धूपः

**Dhūpaḥ** (Offering Incense)

**चन्दनागरुधूपेन, सुगन्धो मारुतो यथा।**
**यस्य सङ्गादहं धन्यः, तस्मै श्रीगुरवे नमः॥**

**सत्पुरुषाय सद्गुरवे नमः, धूपमाघ्रापयामि॥**

Candanāgarudhūpena, sugandho māruto yathā ।
Yasya saṅgād ahaṃ dhanyaḥ, tasmai śrīgurave namaḥ ॥

Satpuruṣāya sadgurave namaḥ, dhūpam āghrāpayāmi ॥

### दीपः

**Dīpaḥ** (Showing a small lamp)

**आवृतस्वस्वरूपाणां, त्रितापक्लिष्टदेहिनाम्।**
**शास्त्रवाक्यार्थदीपेना - वृतिनाशकमाश्रये॥**

**आवृतिनाशकाय सद्गुरवे नमः, दीपं दर्शयामि॥**

Āvṛtasvasvarūpāṇāṃ tritāpakliṣṭadehinām ।
Śāstravākyārthadīpenā - vṛtināśakam āśraye ॥

Āvṛtināśakāya sadgurave namaḥ, dīpaṃ darśayāmi ॥

## नैवेद्यम्

**Naivedyam** (Offering Food)

**क्षुत्पिपासान्ध्यबाधिर्य - कामक्रोधादयोऽखिलाः।**
**लिङ्गदेहगता एते, ह्यलिङ्गस्य न विद्यते।।**
**क्षुत्पिपासारहिताय सद्गुरवे नमः, इदं सर्वं निवेदयामि।।**

Kṣutpipāsāndhyabādhirya - kāmakrodhādayo'khilāḥ |
Liṅgadehagatā ete, hyaliṅgasya na vidyate ||
Kṣutpipāsārahitāya sadgurave namaḥ, idaṃ sarvaṃ nivedayāmi ||

## नीराजनम्

**Nīrājanam** (Waving lighted-camphor)

**हिरण्मये परे कोशे, विरजं ब्रह्म निष्कलम्।**
**तच्छुभ्रं ज्योतिषां ज्योतिः, तद्यदात्मविदो विदुः।।**
**ज्योतिःस्वरूपाय सद्गुरवे नमः, नीराजनं सन्दर्शयामि।।**

Hiraṇmaye pare kośe, virajaṃ brahma niṣkalam |
Tacchubhraṃ jyotiṣāṃ jyotiḥ, tad yad ātmavido viduḥ ||
Jyotiḥsvarūpāya sadgurave namaḥ, nīrājanaṃ sandarśayāmi ||

**न तत्र सूर्यो भाति न चन्द्रतारकं,**
**नेमा विद्युतो भान्ति कुतोऽयमग्निः।**
**तमेव भान्तमनुभाति सर्वं,**
**तस्य भासा सर्वमिदं विभाति।।**

Na tatra sūryo bhāti na candratārakaṃ,
nemā vidyuto bhānti kuto'yam agniḥ |
Tam eva bhāntam anubhāti sarvaṃ,
tasya bhāsā sarvam idaṃ vibhāti ||

**सर्वोपचाराः**

**Sarvopacārāḥ** (All other offerings)

**अजमनिद्रमस्वप्नम्, अनामकमरूपकम्।**
**सकृद्विभातं सर्वज्ञं, नोपचारः कथञ्चन॥**

**अव्यवहाराय सद्गुरवे नमः, सर्वोपचारान्समर्पयामि॥**

Ajam anidram asvapnam, anāmakam arūpakam |
Sakṛdvibhātaṃ sarvajñaṃ, nopacāraḥ kathañcana ||

Avyavahārāya sadgurave namaḥ, sarvopacārān samarpayāmi ||

**स्तोत्रम्**

**Stotram** (Singing the glory)

**दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः,**
**स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम्।**
**न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये,**
**स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वालौकिकोऽपि॥**

**निरुपमाय सद्गुरवे नमः, स्तोत्राणि समर्पयामि॥**

Dṛṣṭānto naiva dṛṣṭastribhuvanajaṭhare sadgurorjñānadātuḥ,
sparśaścet tatra kalpyaḥ sa nayati yad aho svarṇatām aśmasāram |
Na sparśatvaṃ tathāpi śritacaraṇayuge sadguruḥ svīyaśiṣye,
svīyaṃ sāmyaṃ vidhatte bhavati nirupamastena vālaukiko'pi ||

Nirupamāya sadgurave namaḥ, stotrāṇi samarpayāmi ||

**प्रदक्षिणनमस्काराः**

**Pradakṣiṇanamaskārāḥ** (Circumambulation and prostration)

**यस्य प्रसादादहमेव विष्णुः,**
**मय्येव सर्वं परिकल्पितञ्च।**
**इत्थं विजानामि सदात्मरूपं,**
**तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम्॥**

दुर्दर्शमतिगम्भीरम्, अजं साम्यं विशारदम्।
बुद्ध्वा पदमनानात्वं, नमस्कुर्मो यथाबलम्।।

स्वात्मरूपाय सद्गुरवे नमः, अनन्तकोटिप्रदक्षिणनमस्कारान्समर्पयामि।।

Yasya prasādād ahameva viṣṇuḥ,
mayyeva sarvaṃ parikalpitañca ।
Itthaṃ vijānāmi sadātmarūpam,
tasyāṅghripadmaṃ praṇato'smi nityam ।।

Durdarśam atigambhīram, ajaṃ sāmyaṃ viśāradam ।
Buddhvā padam anānātvaṃ, namaskurmo yathābalam ।।

Svātmarūpāya sadgurave namaḥ, anantakoṭipradakṣiṇanamaskārān samarpayāmi ।।

# APPENDIX

## गुरु-अष्टोत्तरशत-नामावलिः
## GURU-AṢṬOTTARAŚATA-NĀMĀVALIḤ

### ध्यानम्
### Dhyānam

**नारायणं पद्मभुवं वसिष्ठं, शक्तिञ्च तत्पुत्रपराशरञ्च।**
**व्यासं शुकं गौडपदं महान्तं, गोविन्दयोगीन्द्रमथास्य शिष्यम्।।**
**श्रीशङ्कराचार्यमथास्य पद्म-पादञ्च हस्तामलकञ्च शिष्यम्।**
**तं तोटकं वार्तिककारमन्यान्, अस्मद्गुरून्सन्ततमानतोऽस्मि।।**

Nārāyaṇaṃ padmabhuvaṃ vasiṣṭhaṃ, śaktiñca tatputraparāśarañca ।
Vyāsaṃ śukaṃ gauḍapadaṃ mahāntaṃ, govindayogīndram athāsya śiṣyam ।।
Śrīśaṅkarācāryam athāsya padma - pādañca hastāmalakañca śiṣyam ।
Taṃ toṭakaṃ vārtikakāram anyān, asmadgurūn santatam ānato'smi ।।

**सदाशिवसमारम्भां, शङ्कराचार्यमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां, वन्दे गुरुपरम्पराम्।।**

Sadāśivasamārambhāṃ, śaṅkarācāryamadhyamām ।
Asmadācāryaparyantāṃ, vande guruparamparām ।।

**श्रीदक्षिणामूर्तिसुदेशिकेन्द्रं, द्वैपायनं सूत्रकृतं मुनीन्द्रम्।**
**श्रीशङ्करं भाष्यकृतं यतीन्द्रं, मद्देशिकञ्चापि नमामि वित्त्यै।।**

Śrīdakṣiṇāmūrtisudeśikendraṃ,
dvaipāyanaṃ sūtrakṛtaṃ munīndram ।
Śrīśaṅkaraṃ bhāṣyakṛtaṃ yatīndraṃ,
maddeśikañcāpi namāmi vittyai ।।

(See the next page for Nāmāvaliḥ)

| | | |
|---|---|---|
| 1. | ओं सद्गुरवे नमः | Oṃ sadgurave namaḥ |
| 2. | ओं अज्ञाननाशकाय नमः | Oṃ ajñānanāśakāya namaḥ |
| 3. | ओं अदम्भिने नमः | Oṃ adambhine namaḥ |
| 4. | ओं अद्वैतप्रकाशकाय नमः | Oṃ advaitaprakāśakāya namaḥ |
| 5. | ओं अनपेक्षाय नमः | Oṃ anapekṣāya namaḥ |
| 6. | ओं अनसूयवे नमः | Oṃ anasūyave namaḥ |
| 7. | ओं अनुपमाय नमः | Oṃ anupamāya namaḥ |
| 8. | ओं अभयप्रदात्रे नमः | Oṃ abhayapradātre namaḥ |
| 9. | ओं अमानिने नमः | Oṃ amānine namaḥ |
| 10. | ओं अहिंसामूर्तये नमः | Oṃ ahiṃsāmūrtaye namaḥ |
| 11. | ओं अहेतुकदयासिन्धवे नमः | Oṃ ahetukadayāsindhave namaḥ |
| 12. | ओं अहङ्कारनाशकाय नमः | Oṃ ahaṅkāranāśakāya namaḥ |
| 13. | ओं अहङ्कारवर्जिताय नमः | Oṃ ahaṅkāravarjitāya namaḥ |
| 14. | ओं आचार्येन्द्राय नमः | Oṃ ācāryendrāya namaḥ |
| 15. | ओं आत्मसन्तुष्टाय नमः | Oṃ ātmasantuṣṭāya namaḥ |
| 16. | ओं आनन्दमूर्तये नमः | Oṃ ānandamūrtaye namaḥ |
| 17. | ओं आर्जवयुक्ताय नमः | Oṃ ārjavayuktāya namaḥ |
| 18. | ओं उचितवाचे नमः | Oṃ ucitavāce namaḥ |
| 19. | ओं उत्साहिने नमः | Oṃ utsāhine namaḥ |
| 20. | ओं उदासीनाय नमः | Oṃ udāsīnāya namaḥ |
| 21. | ओं उपरताय नमः | Oṃ uparatāya namaḥ |
| 22. | ओं ऐश्वर्ययुक्ताय नमः | Oṃ aiśvaryayuktāya namaḥ |
| 23. | ओं कृतकृत्याय नमः | Oṃ kṛtakṛtyāya namaḥ |

| | | |
|---|---|---|
| 24. | ओं क्षमावते नमः | Oṃ kṣamāvate namaḥ |
| 25. | ओं गुणातीताय नमः | Oṃ guṇātītāya namaḥ |
| 26. | ओं चारुवाग्विलासाय नमः | Oṃ cāruvāgvilāsāya namaḥ |
| 27. | ओं चारुहासाय नमः | Oṃ cāruhāsāya namaḥ |
| 28. | ओं छिन्नसंशयाय नमः | Oṃ chinnasaṃśayāya namaḥ |
| 29. | ओं ज्ञानदात्रे नमः | Oṃ jñānadātre namaḥ |
| 30. | ओं ज्ञानयज्ञतत्पराय नमः | Oṃ jñānayajñatatparāya namaḥ |
| 31. | ओं तत्त्वदर्शिने नमः | Oṃ tattvadarśine namaḥ |
| 32. | ओं तपस्विने नमः | Oṃ tapasvine namaḥ |
| 33. | ओं तापहराय नमः | Oṃ tāpaharāya namaḥ |
| 34. | ओं तुल्यनिन्दास्तुतये नमः | Oṃ tulyanindāstutaye namaḥ |
| 35. | ओं तुल्यप्रियाप्रियाय नमः | Oṃ tulyapriyāpriyāya namaḥ |
| 36. | ओं तुल्यमानापमानाय नमः | Oṃ tulyamānāpamānāya namaḥ |
| 37. | ओं तेजस्विने नमः | Oṃ tejasvine namaḥ |
| 38. | ओं त्यक्तसर्वपरिग्रहाय नमः | Oṃ tyaktasarvaparigrahāya namaḥ |
| 39. | ओं त्यागिने नमः | Oṃ tyāgine namaḥ |
| 40. | ओं दक्षाय नमः | Oṃ dakṣāya namaḥ |
| 41. | ओं दान्ताय नमः | Oṃ dāntāya namaḥ |
| 42. | ओं दृढव्रताय नमः | Oṃ dṛḍhavratāya namaḥ |
| 43. | ओं दोषवर्जिताय नमः | Oṃ doṣavarjitāya namaḥ |
| 44. | ओं द्वन्द्वातीताय नमः | Oṃ dvandvātītāya namaḥ |
| 45. | ओं धीमते नमः | Oṃ dhīmate namaḥ |
| 46. | ओं धीराय नमः | Oṃ dhīrāya namaḥ |

| | | |
|---|---|---|
| 47. | ओं नित्यसन्तुष्टाय नमः | Oṃ nityasantuṣṭāya namaḥ |
| 48. | ओं निरहङ्काराय नमः | Oṃ nirahaṅkārāya namaḥ |
| 49. | ओं निराश्रयाय नमः | Oṃ nirāśrayāya namaḥ |
| 50. | ओं निर्भयाय नमः | Oṃ nirbhayāya namaḥ |
| 51. | ओं निर्मदाय नमः | Oṃ nirmadāya namaḥ |
| 52. | ओं निर्ममाय नमः | Oṃ nirmamāya namaḥ |
| 53. | ओं निर्मलाय नमः | Oṃ nirmalāya namaḥ |
| 54. | ओं निर्मोहाय नमः | Oṃ nirmohāya namaḥ |
| 55. | ओं निर्योगक्षेमाय नमः | Oṃ niryogakṣemāya namaḥ |
| 56. | ओं निर्लोभाय नमः | Oṃ nirlobhāya namaḥ |
| 57. | ओं निष्कामाय नमः | Oṃ niṣkāmāya namaḥ |
| 58. | ओं निष्क्रोधाय नमः | Oṃ niṣkrodhāya namaḥ |
| 59. | ओं निस्सङ्गाय नमः | Oṃ nissaṅgāya namaḥ |
| 60. | ओं परमसुखदाय नमः | Oṃ paramasukhadāya namaḥ |
| 61. | ओं पण्डिताय नमः | Oṃ paṇḍitāya namaḥ |
| 62. | ओं पूर्णाय नमः | Oṃ pūrṇāya namaḥ |
| 63. | ओं प्रमाणप्रवर्तकाय नमः | Oṃ pramāṇapravartakāya namaḥ |
| 64. | ओं प्रियभाषिणे नमः | Oṃ priyabhāṣiṇe namaḥ |
| 65. | ओं ब्रह्मकर्मसमाधये नमः | Oṃ brahmakarmasamādhaye namaḥ |
| 66. | ओं ब्रह्मात्मनिष्ठाय नमः | Oṃ brahmātmaniṣṭhāya namaḥ |
| 67. | ओं ब्रह्मात्मविदे नमः | Oṃ brahmātmavide namaḥ |
| 68. | ओं भक्ताय नमः | Oṃ bhaktāya namaḥ |
| 69. | ओं भवरोगहराय नमः | Oṃ bhavarogaharāya namaḥ |

| | | |
|---|---|---|
| 93. | ओं श्रद्धावते नमः | Oṃ śraddhāvate namaḥ |
| 94. | ओं श्रोत्रियाय नमः | Oṃ śrotriyāya namaḥ |
| 95. | ओं सत्यवाचे नमः | Oṃ satyavāce namaḥ |
| 96. | ओं सदामुदितवदनाय नमः | Oṃ sadāmuditavadanāya namaḥ |
| 97. | ओं समचित्ताय नमः | Oṃ samacittāya namaḥ |
| 98. | ओं समानाधिकवर्जिताय नमः | Oṃ samānādhikavarjitāya namaḥ |
| 99. | ओं समाहितचित्ताय नमः | Oṃ samāhitacittāya namaḥ |
| 100. | ओं सर्वभूतहिताय नमः | Oṃ sarvabhūtahitāya namaḥ |
| 101. | ओं सिद्धाय नमः | Oṃ siddhāya namaḥ |
| 102. | ओं सुलभाय नमः | Oṃ sulabhāya namaḥ |
| 103. | ओं सुशीलाय नमः | Oṃ suśīlāya namaḥ |
| 104. | ओं सुहृदे नमः | Oṃ suhṛde namaḥ |
| 105. | ओं सूक्ष्मबुद्धये नमः | Oṃ sūkṣmabuddhaye namaḥ |
| 106. | ओं सङ्कल्पवर्जिताय नमः | Oṃ saṅkalpavarjitāya namaḥ |
| 107. | ओं सम्प्रदायविदे नमः | Oṃ sampradāyavide namaḥ |
| 108. | ओं स्वतन्त्राय नमः | Oṃ svatantrāya namaḥ |

ॐ तत् सत्
Oṃ Tat Sat

# ओं श्रीमत्परमहंस परिव्रजकाचार्यवर्य
# श्री दयानन्द सरस्वती पूज्यपाद दकाराद्यष्टोत्तरशातनामावलिः ॥

oṃ śrīmatparamahaṃsa parivrajakācāryavarya
śrī dayānanda sarasvatī pūjyapāda
dakārādyaṣṭottaraśātanāmāvaliḥ

| | | |
|---|---|---|
| 1. | ओं देशिकेन्द्राय नमः । | oṃ deśikendrāya namaḥ |
| 2. | ओं दयानन्दाय नमः । | oṃ dayānandāya namaḥ |
| 3. | ओं दरस्मेरमुखाम्बुजाय नमः । | oṃ darasmeramukhāmbujāya namaḥ |
| 4. | ओं दुर्लभाय नमः । | oṃ durlabhāya namaḥ |
| 5. | ओं दुर्जयाय नमः । | oṃ durjayāya namaḥ |
| 6. | ओं दान्ताय नमः । | oṃ dāntāya namaḥ |
| 7. | ओं द्रव्यापेक्षाविवर्जिताय नमः । | oṃ dravyopekṣāvivarjitāya namaḥ |
| 8. | ओं दर्पदूराय नमः । | oṃ darpadūrāya namaḥ |
| 9. | ओं दमोदेवाय नमः । | oṃ damodevāya namaḥ |
| 10. | ओं देवासुरनमस्कृताय नमः । | oṃ devāsuranamaskṛtāya namaḥ |
| 11. | ओं दामोदराय नमः । | oṃ dāmodarāya namaḥ |
| 12. | ओं दृढप्रज्ञाय नमः । | oṃ dṛḍhaprajñāya namaḥ |
| 13. | ओं दिव्याचारविशोभिताय नमः । | oṃ divyācāraviśobhitāya namaḥ |
| 14. | ओं दविष्ठाय नमः । | oṃ daviṣṭhāya namaḥ |
| 15. | ओं दुर्धराय नमः । | oṃ durdharāya namaḥ |
| 16. | ओं दक्षाय नमः । | oṃ dakṣāya namaḥ |
| 17. | ओं दैवस्मरणतत्पराय नमः । | oṃ daivasmaraṇatatparāya namaḥ |
| 18. | ओं द्वेषहीनाय नमः । | oṃ dveṣahīnāya namaḥ |
| 19. | ओं द्वेष्यहीनाय नमः । | oṃ dveṣyahīnāya namaḥ |
| 20. | ओं दुष्टचित्तप्रसादकाय नमः । | oṃ duṣṭacittaprasādakāya namaḥ |
| 21. | ओं दुःखघ्नाय नमः । | oṃ duḥkhaghnāya namaḥ |
| 22. | ओं दक्षिणामूर्तये नमः । | oṃ dakṣiṇāmūrtaye namaḥ |
| 23. | ओं दिव्यरूपाय नमः । | oṃ divyarūpāya namaḥ |
| 24. | ओं दृगमृताय नमः । | oṃ dṛgamṛtāya namaḥ |
| 25. | ओं दृढानन्दाय नमः । | oṃ dṛḍhānandāya namaḥ |

| | | |
|---|---|---|
| 26. | ओं दृढज्ञानाय नमः । | oṃ dṛḍhajñānāya namaḥ |
| 27. | ओं दृशिमात्राय नमः । | oṃ dṛśimātrāya namaḥ |
| 28. | ओं दृढव्रताय नमः । | oṃ dṛḍavratāya namaḥ |
| 29. | ओं दमादिगुणसंपन्नाय नमः । | oṃ damādiguṇasaṃpannāya namaḥ |
| 30. | ओं देहत्रयविलक्षणाय नमः । | oṃ dehatrayavilakṣaṇāya namaḥ |
| 31. | ओं द्वैताद्वैतस्वरूपात्मने नमः । | oṃ dvaitādvaitasvarūpātmane namaḥ |
| 32. | ओं दैताद्वैतविवर्जिताय नमः । | oṃ daitādvaitavivarjitāya namaḥ |
| 33. | ओं दुर्धर्षाय नमः । | oṃ durdharṣāya namaḥ |
| 34. | ओं दुर्गमाय नमः । | oṃ durgamāya namaḥ |
| 35. | ओं दुर्गाय नमः । | oṃ durgāya namaḥ |
| 36. | ओं दृप्तायनमः । | oṃ dṛptāya namaḥ |
| 37. | ओं दैवत्यशोभिताय नमः । | oṃ daivatyaśobhitāya namaḥ |
| 38. | ओं दीप्तिमते नमः । | oṃ dīptimate namaḥ |
| 39. | ओं दीक्षकाय नमः । | oṃ dīkṣakāya namaḥ |
| 40. | ओं दण्डाय नमः । | oṃ daṇḍāya namaḥ |
| 41. | ओं देहबाधाविवर्जिताय नमः । | oṃ dehabādhāvivarjitāya namaḥ |
| 42. | ओं दुरन्ताय नमः । | oṃ durantāya namaḥ |
| 43. | ओं दुष्टसंहर्ताय नमः । | oṃ duṣṭasaṃhartāya namaḥ |
| 44. | ओं दर्पदाय नमः । | oṃ darpadāya namaḥ |
| 45. | ओं द्रविणप्रदाय नमः । | oṃ draviṇapradāya namaḥ |
| 46. | ओं दृग्दृश्यतत्वविज्ञाताय नमः । | oṃ dṛgdṛśyatatvavijñātāya namaḥ |
| 47. | ओं देवारिर्देहवर्जिताय नमः । | oṃ devārirdehavarjitāya namaḥ |
| 48. | ओं देवदेवोत्तमाय नमः । | oṃ devadevottamāya namaḥ |
| 49. | ओं दुरावासाय नमः । | oṃ durāvāsāya namaḥ |
| 50. | ओं दृढाय नमः । | oṃ dṛḍhāya namaḥ |
| 51. | ओं दोषविनाशकाय नमः । | oṃ doṣavināśakāya namaḥ |
| 52. | ओं दार्शनिकाय नमः । | oṃ dārśanikāya namaḥ |
| 53. | ओं दुराराध्याय नमः । | oṃ durārādhyāya namaḥ |
| 54. | ओं दुर्निमित्तविनाशकाय नमः । | oṃ durnimittavināśakāya namaḥ |
| 55. | ओं दैवीसम्पत्समारूढाय नमः । | oṃ daivīsampatsamārūḍhāya namaḥ |
| 56. | ओं दग्धाज्ञानिने नमः । | oṃ dagdhājñānine namaḥ |

| | |
|---|---|
| 57. ओं दृढाशयाय नमः । | oṃ dṛḍhāśayāya namaḥ |
| 58. ओं दुर्वासनापरित्यागिने नमः । | oṃ durvāsanāparityāgine namaḥ |
| 59. ओं दित्सुर्दैवसमाहिताय नमः । | oṃ ditsurdaivasamāhitāya namah |
| 60. ओं दाक्षिण्यशीलसंयुक्ताय नमः । | oṃ dākṣiṇyaśīlasaṃyuktāya namaḥ |
| 61. ओं दुरितौघविनाशकाय नमः । | oṃ duritaughavināśakāya namaḥ |
| 62. ओं दीनार्तिध्वंसकाय नमः । | oṃ dīnārtidhvaṃsakāya namaḥ |
| 63. ओं दीप्ताय नमः । | oṃ dīptāya namaḥ |
| 64. ओं द्विजन्मानिने नमः । | oṃ dvijanmānine namaḥ |
| 65. ओं दुष्टदूरगाय नमः । | oṃ duṣṭadūragāya namaḥ |
| 66. ओं दरान्दोलितदीर्घाक्षाय नमः । | oṃ darāndolitadīrghākṣāya namaḥ |
| 67. ओं द्वैधीभावविवर्जिताय नमः । | oṃ dvaidhībhāvavivarjitāya namaḥ |
| 68. ओं दर्शनादर्शनत्यक्ताय नमः । | oṃ darśanādarśanatyaktāya namaḥ |
| 69. ओं दूरीकृतविपर्ययाय नमः । | oṃ dūrīkṛtaviparyayāya namaḥ |
| 70. ओं दयिताद्यानन्दाय नमः । | oṃ dayitādayānandāya namaḥ |
| 71. ओं दर्पदाय नमः । | oṃ darpadāya namaḥ |
| 72. ओं दम्भनाशकाय नमः । | oṃ dambhanāśakāya namaḥ |
| 73. ओं दारुणाय नमः । | oṃ dāruṇāya namaḥ |
| 74. ओं दक्षिणाय नमः । | oṃ dakṣiṇāya namaḥ |
| 75. ओं दाताय नमः । | oṃ dātāya namaḥ |
| 76. ओं देहात्मभाववर्जिताय नमः । | oṃ dehātmabhāvavarjitāya namaḥ |
| 77. ओं दुस्सङ्कल्पपरित्यागिने नमः । | oṃ dussaṅkalpaparityāgine namaḥ |
| 78. ओं दीप्तात्मज्ञानशोभिताय नमः । | oṃ dīptātmajñānaśobhitāya namaḥ |
| 79. ओं देशकालविमुक्तात्मने नमः । | oṃ deśakālavimuktātmane namaḥ |
| 80. ओं देशकालसमायुक्ताय नमः । | oṃ deśakālasamāyuktāya namaḥ |
| 81. ओं दिव्यज्ञानीदुरीहहाय नमः । | oṃ divyajñānīdurīhahāya namaḥ |
| 82. ओं दिव्यदृष्टिसमायुक्ताय नमः । | oṃ divyadṛṣṭisamāyuktāya namaḥ |
| 83. ओं दिगन्तव्याप्तकीर्तिमानिने नमः । | oṃ digantavyāptakīrtimānine namaḥ |
| 84. ओं दुस्तराय नमः । | oṃ dustarāya namaḥ |
| 85. ओं दीक्षिताय नमः । | oṃ dīkṣitāya namaḥ |
| 86. ओं दिव्याय नमः । | oṃ divyāya namaḥ |
| 87. ओं दिव्यज्ञानप्रचारकाय नमः । | oṃ divyajñānapracārakāya namaḥ |

| | |
|---|---|
| 88. ओं दयालवे नमः । | oṃ dayālave namaḥ |
| 89. ओं द्रवात्मरूपाय नमः । | oṃ dravātmarūpāya namaḥ |
| 90. ओं दहराकाशसंस्थिताय नमः । | oṃ daharākāśasaṃsthitāya namaḥ |
| 91. ओं दाशमानशरञ्जनाय नमः | oṃ dāśamānaśarañjanāya namaḥ |
| 92. ओं दिव्यास्त्रवाक्समायुक्ताय नमः । | oṃ divyāstravāksamāyuktāya namaḥ |
| 93. ओं दत्तवाग्झरसंयुताय नमः । | oṃ dattavāgjharasaṃyutāya namaḥ |
| 94. ओं दुराचारातिदूरस्थाय नमः । | oṃ durācārātidūrasthāya namaḥ |
| 95. ओं दूरिकृतकुसंशयाय नमः । | oṃ dūrikṛtakusaṃśayāya namaḥ |
| 96. ओं देहदुःखपरित्यागिने नमः । | oṃ dehaduḥkhaparityāgine namaḥ |
| 97. ओं दंभ्भाऽहङ्कारवर्जिताय नमः । | oṃ daṃbhbhā 'haṅkāravarjitāya namaḥ |
| 98. ओं द्वन्द्वमोहविनिर्मुक्ताय नमः । | oṃ dvandvamohavinir-muktāya namaḥ |
| 99. ओं देहात्माज्ञानबाधकाय नमः । | oṃ dehātmājñānabādhakāya namaḥ |
| 100. ओं दीनोद्धारणसंसक्ताय नमः । | oṃ dīnoddhāraṇasaṃsaktāya namaḥ |
| 101. ओं दिव्यमानुषविग्रहाय नमः । | oṃ divyamānuṣavigrahāya namaḥ |
| 102. ओं दयारससुधासिन्धवे नमः । | oṃ dayārasasudhāsindhave namaḥ |
| 103. ओं दानशूराय नमः । | oṃ dānaśūrāya namaḥ |
| 104. ओं दारिद्र्यध्वंसिने नमः । | oṃ dāridryadhvaṃsine namaḥ |
| 105. ओं दुःखशोकप्रशमनाय नमः । | oṃ duḥkhaśokapraśamanāya namaḥ |
| 106. ओं देवासुरगणाध्यक्षाय नमः । | oṃ devāsuragaṇādhyakṣāya namaḥ |
| 107. ओं दिव्यमङ्गलविग्रहाय नमः । | oṃ divyamaṅgalavigrahāya namaḥ |
| 108. ओं दृढप्रज्ञाय नमः । | oṃ dṛḍhaprajñāya namaḥ |

---

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
श्रीमत्दयानन्दसद्गुरुभ्यो नमः ।

śrīmatparamahaṃsaparivrājakācāryavarya
śrīmatdayānandasadgurubhyo namaḥ